Shri Nrisimha Ashtakam

શ્રીનૃસિંહાષ્ટકમ્ ૬

Document Information

Text title : Shri Nrisimha Ashtakam

File name : nRRisiMhAShTakam6.itx

Category : vishhnu, dashAvatAra, aShTaka, viShNu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

sanskritdocuments.org

શ્રીનૃસિંહાષ્ટકમ્ ૬

(મત્તમયૂરીવૃત્તમ્)
સદ્રૂપેણાદૌ વિલસન્તં શ્રુતિગાનમ્ ।
પૂર્ણબ્રહ્માનન્દમનાદિ વિગતાનમ્ ।
પશ્ચાત્તં માયાગુણયુક્તં સૃજનેઽહમ્ ।
વન્દે ભક્તામરવૃક્ષં નરસિંહમ્ ॥ ૧॥ ધ્રુ. ॥

પ્રેમ્ણા પદ્માલાલિતપાદં ભગવન્તમ્ ।
બ્રહ્મેન્દ્રાદ્યૈઃ સિદ્ધમુનીન્દ્રૈર્નતદેહમ્ । વન્દે ॥ ૨॥

વિદ્યુદ્વસ્ત્રં પઙ્કજનેત્રં સ્મિતહાસ્યં
વિશ્વાધારં પૂતચરિત્રં દ્યુડુપાસ્યમ્ ।
મેઘશ્યામં સર્વગરુત્મત્પ્રતિવાહં
વન્દે ભક્તામરવૃક્ષં નરસિંહમ્ । વન્દે ॥ ૩॥

ત્રસ્તૈર્દેવૈર્દાનવભીત્યાનુતપાદં
યોવિર્ભૂત્વા મોદં કૃતવાન્ સુરવૃન્દમ્ ।
પ્રહ્લાદાર્થં સંસદિ સ્તમ્ભે ધૃતદેહં
વન્દે ભક્તામરવૃક્ષં નરસિંહમ્ । વન્દે ॥ ૪॥

ઉગ્રં રૂપં યો ધૃતવાન્વૈ સુભીષ્મં
ભાસાલ્લુતં સુર્યજતેજઃ ખલુ ગ્રૈષ્મમ્ ।
હર્યક્ષાસ્યં દુર્જનચિત્તોધૃતમોહં
વન્દે ભક્તામરવૃક્ષં નરસિંહમ્ । વન્દે ॥ ૫॥

ઊરૌ ધૃત્વા પાણિજભિન્નાસુરપાલં
નિષ્કાસ્યાન્ત્રાન્ કન્ધરદેશે કૃતમાલમ્ ।
રૌદ્રદૃશ્યાન્યાશિતમાંસાદિ સમૂહં
વન્દે ભક્તામરવૃક્ષં નરસિંહમ્ । વન્દે ॥ ૬॥

દૂરસ્થૈર્નખૈઃ સુનૃતં સુરપાલં
ભક્ત્યા તુષ્ટાલિઙ્ગિતવાન્યો રિપુબાલમ્ ।
શાન્ત કાન્તં પાલિતસઘં પદદેહં
વન્દે ભક્તામરવૃક્ષં નરસિંહમ્ । વન્દે ॥ ૭॥

માયાતીતં સર્વસુપૂજ્યં કમલેશં
સ્વાન્તારામં ધ્યાનસુગમ્યં પરમેશમ્ ।
ભીમાતીરે સઙ્ગમદેશે કૃતગેહં
વન્દે ભક્તામરવૃક્ષં નરસિંહમ્ । વન્દે ॥ ૮॥

દત્તાત્રેયં પાલય દીનં ભવભીતં
પ્રેમ્ણાન્ધ્રિપ્રાન્તેઽર્પિતવાણિં યતચિત્તમ્ ।
સૌખ્યં દત્વા તે નય માં ત્વં નિજદેહં
વન્દે ભક્તામરવૃક્ષં નરસિંહમ્ । વન્દે ॥ ૯॥

ઇતિ શ્રીનૃસિંહાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by M K Barman

Shri Nrisimha Ashtakam

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*